শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

মার্কণ্ডেয কৃতম্

# ॥শ্রী নৃসিংহ মৃত্যুঞ্জয স্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ

শ্ৰীমতে ৰামানুজায নমঃ

# ॥শ্ৰী নৃসিংহ মৃত্যুঞ্জয স্তোত্ৰম্॥

মাৰ্কণ্ডেয উৱাচ

নাৰাযণং সহস্ৰাক্ষং পদ্মনাভং পুৰাতনম্।
প্ৰণতোস্মি হৃষীকেশং কিং মে মৃত্যুঃ কৰিষ্যতি॥ ১॥

গোৱিন্দং পুণ্ডৰীকাক্ষমনন্তমজমৱ্যযম্।
কেশৱং চ প্ৰপন্নোস্মি কিং মে মৃত্যুঃ কৰিষ্যতি॥ ২॥

ৱাসুদেৱং জগদ্যোনিং ভানুৱৰ্ণমতীন্দ্ৰিযম্।
দামোদৰং প্ৰপন্নোস্মি কিং মে মৃত্যুঃ কৰিষ্যতি॥ ৩॥

শঙ্খচক্ৰধৰং দেৱং ছন্নৰূপিণমৱ্যযম্।
অধোক্ষজং প্ৰপন্নোস্মি কিং মে মৃত্যুঃ কৰিষ্যতি॥ ৪॥

ৱাৰাহং ৱামনং ৱিষ্ণুং নৰসিংহং জনাৰ্দনম্।
মাধৱং চ প্ৰপন্নোস্মি কিং মে মৃত্যুঃ কৰিষ্যতি॥ ৫॥

পুৰুষং পুষ্কৰং পুণ্যং ক্ষেমবীজং জগতপতিম্।
লোকনাথং প্ৰপন্নোস্মি কিং মে মৃত্যুঃ কৰিষ্যতি॥ ৬॥

ভূতাত্মানং মহাত্মানং জগদ্যোনিমযোনিজম্।
ৱিশ্বৰূপং প্ৰপন্নোস্মি কিং মে মৃত্যুঃ কৰিষ্যতি॥ ৭॥

সহস্ৰশিৰসং দেৱং ৱ্যক্তাৱ্যক্তং সনাতনম্।
মহাযোগং প্ৰপন্নোস্মি কিং মে মৃত্যুঃ কৰিষ্যতি॥ ৮॥

ইত্যুদীৰিতমাকৰ্ণ্য স্তোত্ৰং তস্য মহাত্মনঃ।
অপযাতস্ততো মৃত্যুৰ্ৱিষ্ণুদূতৈশ্চ পীডিতঃ॥ ৯॥

ইতি তেন জিতো মৃত্যুৰ্মাৰ্কণ্ডেযেন ধীমতা।
প্ৰসন্নে পুণ্ডৰীকাক্ষে নৃসিংহে নাস্তি দুৰ্লভম্॥ ১০॥

মৃত্যুঞ্জযমিদং পুণ্যং মৃত্যুপ্ৰশমনং শুভম্।
মাৰ্কণ্ডেযহিতাৰ্থায স্ৱযং ৱিষ্ণুৰুৱাচ হ॥ ১১॥

www.prapatti.com

যো ইদং পঠতে ভক্ত্যা ত্রিকালং নিযতঃ শুচিঃ।
নাকালে তস্য মৃত্যুঃ স্যান্নরস্যাচ্যুত চেতসঃ॥ ১২ ॥

হৃতপদ্মমধ্যে পুরুষং পুরাণং
নারাযণং শাশ্বতমাদিদেৱম্।
সঞ্চিন্ত্য সূর্যাদপি রাজমানং
মৃত্যুং স যোগী জিতৱাংস্তদৈৱ॥ ১৩ ॥

॥ ইতি শ্রী নৃসিংহ মৃত্যুঞ্জয় স্তোত্রং সংপূর্ণম্॥

www.prapatti.com